मधीयते शौनका० णिनि। पुरुषांशकर्षिणा प्रोक्ताध्येतृषु।

**पौरुषेय** पु० पुरुषस्य वधादि "पुरुषाद्वधविकारसमूहतेन कृतेषु" पा० ठञ्। पुरुषस्य १वधे २विकारे ३समूहे ४तेन कृते च।

**पौरेय** त्रि० पुरस्यादूरदेशादि सख्या० ढञ्। नगरसमीपादौ

**पौरोगव** पु० पुरोऽग्रे पाचयवस्तुषु गौर्नेत्रं यस्य पुरोगुः ततः स्वार्थे प्रज्ञा० अण्। पाकशालाध्यक्षे अमरः।

**पौरोहित** त्रि० पुरोहितस्य धर्म्यम् महिष्या० अण्। पुरोहितस्य धर्म्ये। [कर्मभेदे आश्व०श्रौ०२।१८।६।

**पौर्णदर्व** न० पूर्णया दर्व्या निष्पाद्यं कर्म अण्। वैदिके

**पौर्णमास** पु० पौर्णमास्यां भवः सन्धिवेला० अण्। १पौर्णमासीविहिते यागे "दर्शपौर्णमासाभ्यां यजेत" श्रुतिः स च द्विविधः यावज्जीवकालिकः पञ्चदशीप्रतिपत्सन्धिकाले कर्त्तव्यश्च। तत्कालादिविधानं कात्या० श्रौ० २।१ कण्डिकादौ दृश्यम्। पूर्णो मासश्चन्द्रमास्तस्येयम् अण् पूर्णो मासो यस्यां वर्त्तते "पूर्णमासादण् वक्तव्यः" वा० अण् वा। २शुक्लपक्षीयपञ्चदशकलाक्रियायां तदुपलक्षितकालरूपायां वा ३तिथौ स्त्री ३तदुत्तरप्रतिपदि च "द्वे ह वै पौर्णमास्यौ पूर्वा उत्तरा च तत्र पञ्चदशी पूर्वा प्रतिपदुत्तरा" इति श्रुतेः तत्र पञ्चदशी मुख्या प्रतिपद्गौणी इत्यर्थः।

**पौर्णमासिक** त्रि० पूर्णमास्यां भवः कालाट् ठञ्। पौर्णमासभवे यागादौ वा० यत्। पौर्णमास्य तत्रार्थे।

**पौर्णमी** स्त्री पूर्णतया चन्द्रो-मीयतेऽत्र मा--आधारे घञर्थे क स्वार्थे अण् ङीप्। पूर्णिमातिथौ त्रिका०। [२।१७८

**पौर्त्तिक** त्रि० पूर्त्ताय साधु ठक्। पूर्त्तसाधने कर्मणि मनु०

**पौर्य** पुंस्त्री०पुरस्यापत्यं कुर्वा०ण्य। पुरनामकस्य नृपस्यापत्ये

**पौर्वनगरेय** त्रि० पूर्वनगर्यां भवः नद्या०ढक्। पूर्वनगरीभवे

**पौर्वपदिक** त्रि० पूर्वपदं गृह्णाति ठञ्। पूर्वपदग्राहके।

**पौर्वातिथ** पु० गोत्रप्रवरर्षिभेदे आश्व० श्रौ० १२।१४।१।

**पौर्वापर्य्य** न० पूर्वापरयोर्भावः ष्यञ्। पूर्वापरत्वे।

**पौर्वार्द्ध(र्द्धिक)र्द्ध्य** त्रि० पूर्वार्द्धे भवः यत् अञ् ठञ् वा पूर्वार्द्धभवे। [च। पूर्वाह्णेतन तत्रार्थे त्रि०।

**पौर्वाह्णिक** त्रि० पूर्वाह्णे भवः ठञ्। पूर्वाह्णभवे पक्षे ष्यु तुट्

**पौर्विक** त्रि० पूर्वस्मिन् काले भवः ठञ्। पूर्वकालभवे स्त्रियां ङीप्। "जातिं स्मरति पौर्विकीम्" मनुः ४।१४८।

**पौलस्त्य** पुंस्त्री० पुलस्त्यस्यापत्यं गर्गा०यञ्। पुलस्त्यस्यापत्ये १कुवेरे २रावणादौ च मेदि०। स्त्रियां ङीप् यलोपः। पौलस्ती शूर्पणखायाम्। [विकारे।

**पौलाक** त्रि० पुलाकस्य विकारः पलाशा० अञ्। पुलाक-

**पौलि** पु०पुल--इन् वा० वृद्धिश्च। १ईषद्दग्धे आरब्धपकावस्थे कलायादौ अमरः। स्वार्थे क। तत्रार्थे हेमच०।

**पौलुषि** पु० पुलुषवंशज्ञे सत्ययज्ञे ऋषिभेदे शत०ब्रा०१०।६।१।१

**पौलोमी** स्त्री पुलोम्नोऽपत्यम् अण् अनोलोपः। पुलोमजायां शच्यां हेमच०।

**पौष** पु० पुष्येण युक्ता पौर्णमासी पुष्य—अण् यलोपः ङीप् पौषी सा यत्र मासे अर्द्धमासे वर्षे वा पुनरण्। १पुष्यनक्षत्रयुक्तपौर्णमासीयुक्ते १मासे २पक्षे ३जैवे वर्षभेदे कार्त्तिकशब्दे १६४६पृ० दृश्यम्। "मीनादिस्थो रविर्येषामारम्भः प्रथमक्षणे" इत्यादिरीत्या धनुःस्थरव्यारब्धः शुक्लप्रतिपदादिदर्शान्तात्मको मुख्यचान्द्रपौषः कृष्णपक्षादिपौर्णमास्यन्तः गौणः पौषः, धनूराशिस्थरविकः सौरः पौष इति भेदः तेनान्यत्र भक्तिः।

**पौष्कर** न०पुष्करस्याकारोऽस्त्यस्य मूले प्रज्ञा०अण्। १पुष्करमूले राजनि० पुष्करस्येदम् अण्। २पुष्करसम्बन्धिनि त्रि० विष्णोः पद्मतया प्रादुर्भावयुते ३पाद्मे कल्पे पु०।

**पौष्करमूल** न०स्वार्थे अण्। पुष्करमूले सुगन्धिद्रव्यभेदे भरतः

**पौष्करिणी** स्त्री पुष्कराणां समूहः अण् स्वार्थे अण् वा ततोऽस्त्यर्थे इनि ङीप्। पुष्करिण्यां शब्दच०।

**पौष्करेयक** न० पुष्करे जातादि कत्त्र्या० ढकञ्। पुष्करे जातादौ स्त्रियां ङीप्।

**पौष्कल** त्रि० पुष्कलेन निर्वृत्तम् सङ्कला० अण्। १पुष्कलनिर्वृत्ते २सामभेदे न० "उष्णिहि शफं ककुभि पौष्कलम्" सामसं०भा०धृता श्रुतिः "तस्य गीतं पवस्व मधुमत्तम" इति प्रगाथे (उत्तरा० १प्र०१६) तस्मिन् पूर्वा ककुप् उत्तरा पङ्क्तिः। तत्र (ककुभि) पौष्कलं साम। (तच्च) ऊह गा०१प्र—१६ दर्शितम्।

**पौष्कलावत** पु० दिवोदासधन्वन्तरिं प्रति आयुर्वेदज्ञानार्थं प्रश्नकारके सुश्रुतसहाध्यायिभेदे सुश्रुते १।१अ० दृश्यम्।

**पौष्कलेयक** त्रि० पुष्कले जातादि कत्त्र्या०ढकञ्। पुष्कले-जातादौ स्त्रियां ङीप्।

**पौष्टिक** त्रि० पुष्ट्यै हितम् ठक्। पुष्टिसाधने कर्मभेदे "पुष्टिर्धनजनादीनां वृद्धिरित्यभिधीयते। तद्धेतुभूतं यत् कर्म पौष्टिकं तदिहोच्यते" स्मृतिदुर्गभञ्जनः।

**पौष्टी** स्त्री पुरोर्द्वंपस्य स्त्रीभेदे भा० आ० ६४ अ०।